"गृध्रः कङ्कः कपोतश्च उलूकः श्येन एव च। चिल्लश्च चर्म्मचिल्लश्च भासः पाण्डर एव च॥" क्लिन्ने चक्षुषी अस्य। "क्लिन्नस्य चिल्पिल् लश्चास्य चक्षुषी।" ५।२।३३। इत्यस्य वार्त्तिं इति चिलादेशो लप्रत्ययश्च।) क्लिन्नचक्षुः। क्लिन्ननेत्रयुक्ते त्रि। इति मेदिनी। ले, १६॥

चिल्लका, स्त्री, (चिल्ल इव कायतीति। कै+कः।) भिल्लिका। इति शब्दरत्नावली॥

चिल्लभक्ष्या, स्त्री, (चिल्लस्य भक्ष्या भक्षणीया।) छट्टविलासिनी। इति शब्दचन्द्रिका॥

चिल्लाभः, पुं, (प्रसह्य हारकत्वात् चिल्ल इव आभातीति। आ+भा+कः।) प्रसह्यचौरः। इति त्रिकाण्डशेषः॥ हातछेँचड़ इति गाँटिकाटा इति च भाषा॥

चिल्ली, स्त्री, (चिल्लति हावं करोति चिल्ल्यतेऽनेन वा। चिल्ल+इन्। ततो वा ङीष्।) लोध्रः। पत्रशाकभेदः। तत्पर्य्यायः। चिल्लिका २ डुली ३ अग्निलोहिता ४ मृदुपत्री ५ चारदला ६ चारपत्रा ७ वास्तुकी ८ महद्दला ९ गौड़वास्तुकः १०। (यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये।
"सतीनो वास्तुकश्चुचू चिल्ली मूलकपोतिका। मण्डूकपर्णी जीवन्ती शाकवर्गे प्रशस्यते॥")
अस्य गुणाः। वास्तुकतुल्यत्वम्। चारत्वम्। श्लेष्मपित्तप्रमेहमूत्रकृच्छ्रनाशित्वम्। पथ्यत्वम्। रुचिकारित्वञ्च। इति राजनिर्घण्टः॥
("तद्वच्चिल्ली तु विज्ञेया वातपित्तविकारिणाम्॥" इति हारीते प्रथमे स्थाने दशमेऽध्याये॥)
भिल्लिका। इति शब्दरत्नावली॥

चिविः, पुं, (चीव्यते आदराय गृह्यते इति। चीव ग्रहणे+"सर्व्वधातुभ्य इन्।" उणां ४।११७। इति इन्। पृषोदरादित्वात् ह्रस्वः।) चिबुकम्। इति जटाधरः॥

चिविटः, पुं, (चिपिटः निपातनात् पस्य वः।) चिपिटः। इत्यमरटीका॥

चिविल्लिका, स्त्री, क्षुद्रक्षुपविशेषः। तत्पर्य्यायः। रक्तदला २ क्षुद्रघोली ३ मधुमालपत्रिका ४। अस्या गुणाः। कटुत्वम्। कषायत्वम्। जीर्णज्वरे अतिहितत्वम्। रसायनत्वञ्च। इति राजनिर्घण्टः॥

चिबुः, पुं, (चीव्यते आदरार्थं गृह्यतेऽसौ। चीव+"मृगय्वादयश्च।" उणां। १।३८। इति कुप्रत्ययेन साधुः।) चिबुकम्। इति भरतः॥

चिबुकं, क्ली, (चिबु+स्वार्थे कन्। अभिधानात् क्लीवत्वम्।) अधराधोभागः। इत्यमरः। २। ६। ९०॥ थुँति इति दाड़ि इति च भाषा॥ (यथा, हठयोगप्रदीपिकायाम्। १। ४६।
"उत्तम्भ्य चिबुकं वक्षस्युत्थाप्य पवनं शनैः॥")

चिबुकः, पुं, (चिबुरिव कायतीति। कै+कः।) मुचुकुन्दवृक्षः। इति राजनिर्घण्टः॥

चिह्न, लक्षणे। (अदन्तचुरां-परं-सकं-सेट्।) सौत्रधुरादिरिति वृद्धाः। इत्यमरटीकायां भरतः॥

चिह्नं, क्ली, (चिह्न्यतेऽनेनेति। चिह्न लक्षणे+करणे घञ्।) चिह्न्यते येन तत्। चिना इति दाग् इति च भाषा॥ तत्पर्य्यायः। कलङ्कः २ अङ्कः ३ लाञ्छनम् ४ लक्ष्म ५ लक्षणम् ६ लिङ्गम् ७। इत्यमरः। १।३।१७॥ लक्ष्मणः ८। इति भरतः॥ अभिज्ञानम् ९। इति जटाधरः॥ (यथा, भागवते। ४। १५। ९।
"वैन्यस्य दक्षिणे हस्ते दृष्ट्वा चिह्नं गदाभृतः। पादयोररविन्दञ्च तं वै मेने हरेः कलाम्॥")
पताका। इति मेदिनी। ने, ४॥

चिह्नकारी, [न्] त्रि, (चिह्नं करोतीति। कृ+णिनिः।) घोरदर्शनः। विघाती। इति विश्वः॥

चिह्नधारिणी, स्त्री, (चिह्नं धरति धारयतीति वा। धृ+णिनिः स्त्रियां ङीप्।) श्यामालता। इति शब्दचन्द्रिका॥

चिह्नितः, त्रि, चिह्न+कर्म्मणि क्तः। चिह्नयुक्तः। अङ्कितः। लक्षितः। (यथा, मनुः। १०।५५।
"दिवा चरेयुः कार्य्यार्थं चिह्निता राजशासनैः॥")

चीक, कि मर्षने। इति कविकल्पद्रुमः॥ (चुरां-पक्षे भ्वां-परं-सकं-सेट्।) कि, चीकयति चीकति। मर्षनं सहनं। तथा च। चक्रावतीतरङ्गाश्चीकयन्ति च यदृवपुरिति हलायुधः। वायवः स्पृशन्तीत्यर्थः। भट्टमल्लस्तु मर्षणे इति मूर्द्धन्यषमध्यं पठित्वा क्षमार्थमाह। इति दुर्गादासः॥

चीड़ा, स्त्री, गन्धद्रव्यविशेषः। चीड़ागन्ध इति ख्याता। तत्पर्य्यायः। दारुगन्धा २ गन्धवधूः ३ गन्धमादनी ४ तरुणी ५ तारा ६ भूतमारी ७ मङ्गल्या ८ कपटिनी ९ ग्रहभीतिजित् १०। अस्या गुणाः। कटुत्वम्। कासकफनाशित्वम्। दीपनत्वम्। अत्यन्तसेवनात् पित्तदोषभ्रमापहत्वञ्च। इति राजनिर्घण्टः॥

चीनं, क्ली, (चिनोति कीर्त्त्यादिकमिति। चि+बाहुलकात् नक् दीर्घश्च।) पताका। इति त्रिकाण्डशेषः॥ सीसकम्। इति रत्नमाला॥

चीनः, पुं, (चीयते सञ्चीयते वृषलत्वादिदोषो यत्र। चि+बाहुलकात् नक् दीर्घश्च।) देशविशेषः। चीना इति भाषा॥ यथा,—
"काश्मीरन्तु समारभ्य कामरूपात्तु पश्चिमे। भोटान्तदेशो देवेशि! मानसेशाच्च दक्षिणे। मानसेशाद्दक्षपूर्व्वे चीनदेशः प्रकीर्त्तितः॥" इति शक्तिसङ्गमतन्त्रम्॥
(तद्देशवासिषु तन्नृपेषु च बहुवचनान्तः। यथा, महाभारते।२।२६।९।
"स किरातैश्च चीनैश्च वृतः प्राग्ज्योतिषोऽभवत्॥")
अंशुकविशेषः। (यथा, शकुन्तलायां १ माङ्के।
"चीनांशुकमिव केतोः प्रतिवातं नीयमानस्य॥")
व्रीहिभेदः। तन्तुः। मृगविशेषः। इति मेदिनी। ने, ४॥

चीनकः, पुं, (चीन एव। चीन+स्वार्थे कन्।) धान्यविशेषः। चीना इति भाषा॥ तत्पर्य्यायः। काककङ्गुः २। इति हेमचन्द्रः॥ (यथा, विष्णुपुराणे। १। ६। २१।
"प्रियङ्गवो ह्युदाराश्च कोरदूषाः सचीनकाः॥")
अस्य गुणाः। शोषणत्वम्। वायुवर्द्धकत्वम्। पित्तश्लेष्मनाशित्वम्। रूक्षत्वञ्च। इति राजवल्लभः॥ कङ्गनी। चीनकर्पूरः। इति राजनिर्घण्टः॥ (चीनदेशवासिषु बहुवचनान्तः। यथा, महाभारते। ८। ८। १९।
"सुह्मानङ्गांश्च वादांश्च निषधान् पुण्ड्रचीनकान्॥")

चीनकर्पूरः, पुं, (चीननामकः कर्पूरः।) कर्पूरविशेषः। चीनकर्पूर इति देशान्तरीयभाषा॥ तत्पर्य्यायः। चीनकः २ कृत्रिमः ३ धवलः ४ पटुः ५ मेघसारः ६ तुषारः ७ द्वीपकर्पूरजः ८। अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। ईषच्छीतत्वम्। कफकण्ठदोषक्रिमिनाशित्वम्। मेध्यत्वम्। पावनत्वञ्च। इति राजनिर्घण्टः॥

चीनजं, क्ली, (चीने चीनदेशे जायते इति। जन+डः।) लोहम्। तत्तु तीक्ष्णलौहम्। इति राजनिर्घण्टः॥

चीनपिष्टं, क्ली, (चीनस्य सीसकस्य पिष्टं सतपेषणं वस्तु चूर्णमित्यर्थः।) सिन्दूरम्। इति हेमचन्द्रः॥ सीसकम्। इति राजनिर्घण्टः॥ (यथा, कथासरित्सागरे। २३। ८५।
"चीनपिष्टमयी लोकश्चारणेकमयी च भूः॥")

चीनवङ्गं, क्ली, (चीनभवं वङ्गम्।) सीसकम्। इति राजनिर्घण्टः॥

चीनाकः, पुं, (चीनं चीनाकारमकतीति। अक+अण्।) कर्पूरविशेषः। तद्गुणाः। यथा, भावप्रकाशे।
"चीनाकसंज्ञः कर्पूरः कफक्षयकरः स्मृतः। कुष्ठकण्डूवमिहरस्तथा तिक्तरसश्च सः॥"

चीनाकर्कटी, स्त्री, (चीनमिव स्वादुः कर्कटी। ततः पृषोदरात् साधुः।) कर्कटीप्रभेदः। सा तु चित्रकूटदेशे प्रसिद्धा। तत्पर्य्यायः। राजकर्कटी २ सुदीर्घा ३ राजफला ४ बाला ५ कुलकर्कटी ६। अस्या गुणाः। रुच्यत्वम्। शिशिरत्वम्। पित्तदाहशोषनाशित्वम्। मधुरत्वम्। तृप्तिदत्वम्। हृद्यत्वञ्च। इति राजनिर्घण्टः॥

चीभ, ऋ ङ कत्थे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्।) कत्थः प्रशंसा। ऋ, अचिचीभत्। ङ, चीभते गुणिनं गुणी. ओष्ठ्यवकारादिरयमित्येके। इति दुर्गादासः॥

चीय, ऋ ञ संवृत्यादानयोः। (भ्वां-उभं-सकं-सेट्।) चतुर्थस्वरी। ऋ, अचिचीयत्। ञ, चीयति चीयते। इति दुर्गादासः॥

चीरं, क्ली, (चिनोति आवृणोति वपुः कटिदेशादिकं वा। चि+"शुसिचिमीनां दीर्घश्च।" उणां। २। २५। इति क्रन् दीर्घश्च।) वल्कलम्। (यथा, रामायणे। ५। ३१। २२।
"प्रागेव तु महाबुद्धिः सौमित्रिर्भ्रातृवत्सलः। पूर्व्वजस्यानुयात्रार्थं द्रुमचीरैरलङ्कृतः॥")
जीर्णवस्त्रखण्डम्। इति सुभूतिः। इति लिङ्गादिसंग्रहटीकायां भरतः॥ (यथा, भागवते।२।२।५।